# shrIraghunAthAShTakam

# શ્રીરઘુનાથાષ્ટકમ્

## Document Information

Text title : raghunAthAShTakam

File name : raghunaatha8.itx

Category : aShTaka, raama

Location : doc_raama

Author : Traditional

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : January 07, 2005

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


September 17, 2023

*sanskritdocuments.org*

# શ્રીરઘુનાથાષ્ટકમ્

શ્રી ગણેશાય નમઃ ।

શુનાસીરાધીશૈરવનિતલજ્ઞાપ્તીડિતગુણં
પ્રકૃત્યાઽજં જાતં તપનકુલચણ્ડાંશુમપરમ્ ।
સિતે વૃદ્ધિં તારાધિપતિમિવ યન્તં નિજગૃહે
સસીતં સાનન્દં પ્રણત રઘુનાથં સુરનુતમ્ ॥ ૧॥

નિહન્તારં શૈવં ધનુરિવ ઇવેક્ષું નૃપગણે
પથિ જ્યાકૃષ્ટેન પ્રબલભૃગુવર્યસ્ય શમનમ્ ।
વિહારં ગાર્હસ્થ્યં તદનુ ભજમાનં સુવિમલં
સસીતં સાનન્દં પ્રણત રઘુનાથં સુરનુતમ્ ॥ ૨॥

ગુરોરાજ્ઞાં નીત્વા વનમનુગતં દારસહિતં
સસૌમિત્રિં ત્યક્ત્વેપ્સિતમપિ સુરાણાં નૃપસુખમ્ ।
વિરુપાદ્રાક્ષસ્યાઃ પ્રિયવિરહસન્તાપમનસં
સસીતં સાનન્દં પ્રણત રઘુનાથં સુરનુતમ્ ॥ ૩॥

વિરાધં સ્વર્નીત્વા તદનુ ચ કબન્ધં સુરરિપું
ગતં પમ્પાતીરે પવનસુતસમ્મેલનસુખમ્ ।
ગતં કિષ્કિન્ધાયાં વિદિતગુણસુગ્રીવસચિવં
સસીતં સાનન્દં પ્રણત રઘુનાથં સુરનુતમ્ ॥ ૪॥

પ્રિયાપ્રેક્ષોત્કણ્ઠં જલનિધિગતં વાનરયુતં
જલે સેતું બદ્ધ્વાઽસુરકુલ નિહન્તારમનઘમ્ ।
વિશુદ્ધામર્ધાઙ્ગીં હુતભુજિ સમીક્ષન્તમચલં
સસીતં સાનન્દં પ્રણત રઘુનાથં સુરનુતમ્ ॥ ૫॥

વિમાનં ચારુહ્યાઽનુજજનકજાસેવિતપદ
મયોધ્યાયાં ગત્વા નૃપપદમવાપ્તારમજરમ્ ।
સુયજ્ઞૈસ્તૃપ્તારં નિજમુખસુરાન્ શાન્તમનસં

સસીતં સાનન્દં પ્રણત રઘુનાથં સુરનુતમ્ ॥ ૬॥

પ્રજાં સંસ્થાતારં વિહિતનિજધર્મે શ્રુતિપથં
સદાચારં વેદોદિતમપિ ચ કર્તારમખિલમ્ ।
નૃષુ પ્રેમોદ્રેકં નિખિલમનુજાનાં હિતકરં
સતીતં સાનન્દં પ્રણત રઘુનાથં સુરનુતમ્ ॥ ૭॥

તમઃ કીર્ત્યાશેષાઃ શ્રવણગદનાભ્યાં દ્વિજમુખાસ્તરિષ્યન્તિ
જ્ઞાત્વા જગતિ ખલુ ગન્તારમજનમ્ ॥

અતસ્તાં સંસ્થાપ્ય સ્વપુરમનુનેતારમખિલં
સસીતં સાનન્દં પ્રણત રઘુનાથં સુરનુતમ્ ॥ ૮॥

રઘુનાથાષ્ટકં હૃદ્યં રઘુનાથેન નિર્મિતમ્ ।
પઠતાં પાપરાશિઘ્નં ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૯॥

॥ ઇતિ પણ્ડિત શ્રીશિવદત્તમિશ્રશાસ્ત્રિ વિરચિતં શ્રીરઘુનાથાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

*shrIraghunAthAShTakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*